# Vyasaproktam Surya Hridaya Stotram

# વ્યાસપ્રોક્તં સૂર્યહૃદયસ્તોત્રમ્

## Document Information

Text title : Vyasaproktam Surya Hridaya Stotram

File name : vyAsaproktaMsUryahRRidayastotram.itx

Category : navagraha, hRidaya, stotra

Location : doc_z_misc_navagraha

Proofread by : PSA Easwaran

Description/comments : from Kurmapurana, kUrmapurANe uttarabhAge 18/33-49

Latest update : August 13, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 13, 2022

*sanskritdocuments.org*

# વ્યાસપ્રોક્તં સૂર્યહૃદયસ્તોત્રમ્

વ્યાસ ઉવાચ ।
અથોપતિષ્ઠેદાદિત્યમુદયન્તં સમાહિતઃ ।
મન્ત્રૈસ્તુ વિવિધૈઃ સૌરૈ ઋગ્યજુઃસામસમ્ભવૈઃ ॥ ૧॥

ઉપસ્થાય મહાયોગં દેવદેવં દિવાકરમ્ ।
કુર્વીત પ્રણતિં ભૂમૌ મૂર્ધ્ના તેનૈવ મન્ત્રતઃ ॥ ૨॥

ૐ ઙ્ખદ્યોતાય ચ શાન્તાય કારણત્રયહેતવે ।
નિવેદયામિ ચાત્માનં નમસ્તે જ્ઞાનરૂપિણે ॥ ૩॥

નમસ્તે ઘૃણિને તુભ્યં સૂર્યાય બ્રહ્મરૂપિણે ।
ત્વમેવ બ્રહ્મ પરમમાપો જ્યોતી રસોઽમૃતમ્ ।
ભૂર્ભુવઃસ્વસ્ત્વમોઙ્કારઃ શર્વરુદ્રઃ સનાતનઃ ॥ ૪॥

પુરુષઃ સન્મહોઽન્તસ્થં પ્રણમામિ કપર્દિનમ્ ।
ત્વમેવ વિશ્વં બહુધા જાત યજ્જાયતે ચ યત્ ।
નમો રુદ્રાય સૂર્યાય ત્વામહં શરણં ગતઃ ॥ ૫॥

પ્રચેતસે નમસ્તુભ્યં નમો મીઢુષ્ટમાય તે ।
નમો નમસ્તે રુદ્રાય ત્વામહં શરણં ગતઃ ।
હિરણ્યબાહવે તુભ્યં હિરણ્યપતયે નમઃ ॥ ૬॥

અમ્બિકાપતયે તુભ્યમુમાયાઃ પતયે નમઃ ।
નમોઽસ્તુ નીલગ્રીવાય નમસ્તુભ્યં પિનાકિને ॥ ૭॥

વિલોહિતાય ભર્ગાય સહસ્રાક્ષાય તે નમઃ ।
નમો હંસાય તે નિત્યમાદિત્યાય નમોઽસ્તુ તે ॥ ૮॥

નમસ્તે વજ્રહસ્તાય ત્ર્યમ્બકાય નમો નમઃ ।
પ્રપદ્યે ત્વાં વિરૂપાક્ષં મહાન્તં પરમેશ્વરમ્ ॥ ૯॥

હિરણ્મયે ગૃહે ગુપ્તમાત્માનં સર્વદેહિનામ્ ।
નમસ્યામિ પરં જ્યોતિર્બ્રહ્માણં ત્વાં પરાં ગતિમ્ ॥ ૧૦॥

વિશ્વં પશુપતિં ભીમં નરનારીશરીરિણમ્ ।
નમઃ સૂર્યાય રુદ્રાય ભાસ્વતે પરમેષ્ઠિને ॥ ૧૧॥

ઉગ્રાય સર્વભક્ષાય ત્વાં પ્રપદ્યે સદૈવ હિ ।
એતદ્વૈ સૂર્યહૃદયં જપ્ત્વા સ્તવમનુત્તમમ્ ॥ ૧૨॥

પ્રાતઃ કાલેઽથ મધ્યાહ્ને નમસ્કુર્યાદ્દિવાકરમ્ ।
ઇદં પુત્રાય શિષ્યાય ધાર્મિકાય દ્વિજાતયે ॥ ૧૩॥

પ્રદેયં સૂર્યહૃદયં બ્રહ્મણા તુ પ્રદર્શિતમ્ ।
સર્વપાપપ્રશમનં વેદસારસમુદ્ભવમ્ ।
બ્રાહ્મણાનાં હિતં પુણ્યમૃષિસઙ્ઘૈર્નિષેવિતમ્ ॥ ૧૪॥

અથાગમ્ય ગૃહં વિપ્રઃ સમાચમ્ય યથાવિધિ ।
પ્રજ્વાલ્ય વિહ્નિં વિધિવજ્જુહુયાજ્જાતવેદસમ્ ॥ ૧૫॥

ઋત્વિક્પુત્રોઽથ પત્ની વા શિષ્યો વાઽપિ સહોદરઃ ।
પ્રાપ્યાનુજ્ઞાં વિશેષેણ જુહુયુર્વા યતાવિધિ ॥ ૧૬॥

પવિત્રપાણિઃ પૂતાત્મા શુક્લામ્બરધરઃ શુચિઃ ।
અનન્યમાનસો વહ્નિં જુહુયાત્ સંયતેન્દ્રિયઃ ॥ ૧૭॥

ઇતિ કૂર્મપુરાણે ઉત્તરભાગે અષ્ટાદશાધ્યાયાન્તર્ગતં
વ્યાસપ્રોક્તં સૂર્યહૃદયસ્તોત્રં સમાપ્તમ્ ।
કૂર્મપુરાણે ઉત્તરભાગે ૧૮/૩૩-૪૯

Proofread by PSA Easwaran

*Vyasaproktam Surya Hridaya Stotram*
pdf was typeset on August 13, 2022

Please send corrections to *sanskrit@cheerful.com*